SANATANODAYA सनातनोदय
ISSN (O) : 3048-9318
Vol. 1, No. 1, Year 2024
Available Online : https://sanatanodaya.com/

# श्रीमद्भगीतायां दण्डनीतेः परिकल्पना

*डा. पङ्कज कुमार माहाना*

*अध्यापकः, स्नातकोत्तर संस्कृतविभागः, धरणीधरविश्वविद्यालयः, केन्दुझरः, ओडिशा*

*Email : Pankajmahana22@gmail.com*

श्रीमद्भगीता भगवतः श्रीकृष्णस्य मुखनिसृता अमृतमयी वाणी । इयं गीता सकल पापहारिणी कलकलनिनादिनी पवित्र गङ्गा इव शोभते। भगवतः मुखारविन्दात् निर्गता त्रिपथगा इव भवति । आधुनिक समाजे गीतायाः महती आवश्यकता अस्ति इति नास्ति अत्र संन्देहः। यत्र गीता गीयते तत्र धर्म१ एव राजते । गीतामहात्मये विर्णतमस्ति -

*गीतासुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।*

*या स्वयं पद्मनाभस्य मुखपद्माद्विनिः स्मृता।।२*

किंनाम दण्डः ?

श्रीमद्भगीतायां तत्रदण्डस्य स्वरुपंविषये वर्णितम्अस्ति यत्-

*दण्डो दमयतामस्मि नीतिरस्मिजिगीषताम्*

*मौनं चैवास्मिगुह्यानां ज्ञानं ज्ञानवतामहम् ।।३*

अर्थात् भगवान् श्रीकृष्णः कथयति अहं दमनकारिणां म्दमन शक्तिरुपेण अस्मि । तथा वीजयीनां कृतेनीतिऽस्मि । ये मौनंतिष्ठति ताषांकृतेरक्षकः अस्मि । अपि च मनुस्मृतौ सप्तमऽध्याये दण्डस्य विषये विर्णतम् अस्ति यत्-

*दण्डः शास्तिप्रजाः सर्वादण्ड एवाभिरक्षति ।*

*दण्डः सुप्तेषुजागिर्तदण्डं धर्मविदुर्बुधाः ।।४*

अर्थात् यस्माद् दण्डः सर्वाः प्रजाआज्ञांकरोति तस्मात्साधुक्तंशास्तितेति ज्ञेयम् ।

पुनः दण्डः शव्दस्य निर्वचनं महर्षि यास्केनानेनप्रकारेण कृतं –

*दण्डोददते धारयति कर्मणः।।५*

श्रीमद्भगीतायां दण्डनीतेः परिकल्पना -

भगवतगीताया:चतुर्थाऽध्याये भगवान् श्रीकृष्ण: स्ववतारविषये प्रतिपादयति-

*यदा यदाहि धर्मस्य ग्लानिर्भवतिभारत ।*

*अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥६*

अर्थात् हे अर्जुन:! अहंप्राणिनाम्ईश्वर:। प्राणिजातं मया रचितम् । अहंसंसारातीत: त्रिगुणातीतश्च। तथापि योगमायाम् आश्रित्य युगे युगे भूलोके आत्मानं सृजामि ।यदा सदाचारिणां निरपराधानां दूर्वलानामुपरिदुराचारिणांपापानाम् अत्याचार:वर्धते ,यदा धर्मस्य क्षय: अधर्मस्य उत्थानं जायते,यदा सद्गुणानाम् अभाव: दुर्गुणानां प्रादुर्भाव: संजायते तथा अहं निराकार: सन्नऽपि साकार रूपेण आत्मानंप्रकटीकृत्य अवतरामि । युगे युगेविविध रूपेण धर्म संस्थापनाय अवतरामि । पुनश्च भगवान् उचु: -

*परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।*

*धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥७*

अर्थात् यदा संसारे धर्मस्य क्षय:, अधर्मस्य च उत्थानं जायते । तदा सज्जना: पापिनां दुराचारिणां अन्याचारेण प्रपीडिता: भवन्ति । धार्मिकानां साधुनां रक्षणाय अधार्मिकानांदुष्टानां च विनाशाय, सर्वोपरि संसारे धर्मसंस्थापनार्थाय अहं आत्मनंप्रकटीकरोमि ।एवं भगवान् संसारेपापं विनाशयति ।

यदि मानवा: पापंकृवन्तितर्हि स: कथंनरक: यन्त्रणा भोग:कृवन्तितत्विषये विर्णतम् गीतायां यथा-

*त्रिविधं नरकस्येदं द्वारंनाशनमात्मन:।*

*काम: क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत॥८*

नरकस्य त्रिविधद्वारं अस्ति इति । भगवान् कथयति- काम-क्रोध:-लोभ इत्यादि नरकस्य त्रिविधानिद्वाराणिभवन्ति । एते मानवस्य पतनस्य कारणम्भवति ।

कामऽर्थात्भोगेच्छा। लोभऽर्थात्भोगसंग्रहे प्रयत्न:। क्रोध: अर्थात्कोप:, भोगेच्छायाम् विघ्न: क्रोधं उत्पादयति। इत्थम्कामात्लोभ:.लोभात् क्रोध जायते ।पुन: गीतायाम् उच्यते यत्-

*दण्डो दमयतामस्मि नीतिरस्मिजिगीषताम् ।*

*मौनं चैवस्मिगुह्यानां ज्ञानं ज्ञानवतामहम् ॥९*

अर्थात् अहं दमनकारिणां मध्ये दण्ड:,विजयकामीनां कृतेनीति:, गूह्यानां मध्ये मन: , ज्ञानीनां तत्वज्ञानस्य अधिकारिअस्मि ।

पुन: भगवान्उवाच-

*प्रह्लादश्चास्मि दैत्यानां काल: कलयतामहम् ।*

*मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥१०*

अर्थात् अहं दैत्यानां मध्ये प्रह्लाद:, गणनकारीणां मध्ये काल:, मृगाणां मध्ये मृगेन्द्र: तथापक्षिणां मध्ये वैनतेय: अस्मि। श्रीकृष्ण: उचु:-

*आशापाशशतैर्वद्धा: कामक्रोधपरायणा: ।*

*ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥११*

अर्थात् य: उपर्युक्तदैवसंपदा नकिमपि आचर्यस्वच्छया विदधाति स परमगतिंनवाइति जिज्ञासाया मुच्यते।

पुनश्च भगवान्उवाच-

*य: शास्त्रविधिमुत्सृज्य वर्ततेकामकारत: ।*

*न स सिद्धिमवाप्नोतिनसुखंनपरांगतिम् ॥१२*

अर्थात् य: शास्त्रविधिमवलम्व्य नकिमपिआचरति , स कदापिमुक्तिवान्नभवति।

अत: नरकमार्गं विहाय सन्मार्गेप्रतिवद्धम्ततत्र उच्यते।

यत्-

*सर्वधर्मान् परित्यज्ज मामेकंशरणंव्रज।*

*अहंत्वां सर्वपापेभ्यो मोक्षयिष्यामि माशुच:॥१३*

अर्थात् हे पार्थ! तव स्म्मुखे विविध शास्त्राणां गुह्यतरं ज्ञानं उपस्थापितम् ।तथापि त्वं अस्य वोधने असमर्थ: सन्कर्मकर्तुं नशक्नोषि । सर्वधर्मान् परित्यज्य माम्एकंशरणंव्रज। त्वंमद्भक्तोभव । अचलांभाक्तिंकुरु। तिर्ह अहंत्वां सर्वपापेभ्य: मोक्षयिष्यामि।

एवं रुपेण यदि वयं चिन्तनंकुर्मतिर्हपापेकदापिनिमग्न: नैवभवतिइतिमेमत:।

**पादट्टिपणी-**

१.मनु.-२/९२

२.गीतामहात्मय-पृ-१

३.गीता-१०/३८

४.मनु-७/१८

५-निरुक्ते-२/१/४

६.गीता-४/७

७.गीता-४/८

८.गीता-१६/२१

९.गीता-१०/३८

१०.गीता-१०/३०

११.गीता-१६/१२

१२.गीता-१६/२३

१३.गीता-१८/६६

सहायकग्रन्था:

1. श्रीमद्भगवत्गीता, गीताप्रेस्, गोरखपुर,२०१३

2. भगवत्गीता- श्रीस्वामीशिवानन्द:

3. मनुस्मृति:,चौखम्भासंस्कृतभवन , वाराणसी,२२१००१